## उपान्वध्याङ्वसः । (४८/५४४)

उप अनु अधि आ इत्येवंपूर्वस्य वसतेराधारो यः, तत् कारकं कर्मसञ्ज्ञं भवति । ग्राममुपवसति सेना । पर्वतम्[1]पवसति । ग्राममनुवसति[2] । ग्राममधिवसति[3] । ग्राममावसति[4] ।

[६१] [5]वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः । (म. भा. १.३३२)

[6]ग्रामे उपवसति । भोजननिवृत्तिं करोति इत्यर्थः ॥

## कर्तुरीप्सिततमं कर्म । (४९/५३५)

कर्तुः क्रियया यदाप्तुमिष्टतमं [7]तत् कारकं कर्मसञ्ज्ञं भवति । [8]कटं करोति । ग्रामं गच्छति । कर्तुः इति किम् ? माषेष्वश्वं बध्नाति । कर्मण ईप्सिता माषाः, न कर्तुः[9] । [10]तमब्ग्रहणं किम् ? पयसा ओदनं भुङ्क्ते । कर्म (१.४.४६/५४२) इत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् । [11]इतरथा आधारस्यैव [12]हि स्यात् गेहं प्रविशति इति । ओदनं [13]पचति, सक्तून् पिबति इत्यादिषु न स्यात् । पुनः कर्मग्रहणात् सर्वत्र सिद्ध भवति । कर्मप्रदेशाः––'कर्मणि द्वितीया' (२.३.२/५३७) इत्येवमादयः ॥

## तथायुक्तं चानीप्सितम् । (५०/५३८)

येन प्रकारेण कर्तुरी[14]प्सिततमं क्रियया युज्यते, तेनैव [15]चेत् प्रकारेण [16]यदनीप्सितं युक्तं भवति, तस्य कर्मसञ्ज्ञा विधीयते[17] । ईप्सितादन्यत् [18]सर्वमनीप्सितम् (म. भा. १. ३३३), द्वेष्यम, इतरच्च । विषं भक्षयति । चौरान् पश्यति । ग्रामं गच्छन् वृक्षमूलान्यु[19]पसर्पति ॥

## अकथितं च । (५१/५३९)

अकथितं [20]च यत् कारकं तत् कर्मसञ्ज्ञं भवति । केनाकथितम् ? अपादानादिविशेषकथाभिः । परिगणनं [21]कर्तव्यम् ––

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना ॥ (म. भा. १.३३४)

उपयुज्यते इत्युपयोगः पयःप्रभृति । तस्य निमित्तं गवादि । तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसञ्ज्ञा विधीयते । पाणिना कांस्यपात्र्यां [22]गां दोग्धि पयः[23] । पाण्यादिकमप्युपयोगनिमित्तं, तस्य

---

1. उपवसते ब, सेना इत्यधिकम् फ. 2. 3. 4. सेना इत्यधिकम् फ. 5. वसतेः ह, अनश्यर्थस्य अ. 6. पर्वते उपवसति फ. 7. तत् नास्ति ब. 8. ओदनं पचति क. ड. फ. ह. 9. ईप्सितग्रहणं किम् ? अग्नेर्माणवकं तारयते इत्यधिकम् अ. 10. तमग्रहणं क. ड. 11. इतरथा नास्ति अ. ब. क. ह, अन्यथा इत्येवादिषु फ. 12. हि नास्ति फ. 13. पचते फ. 14. ईप्सितं ड. 15. चेत् नास्ति क. 16. अनीप्सितमपि ड. फ. ह. 17. कर्तुः क्रियया युक्तं यदनीप्सितं तत् कारकं कर्म भवति इत्यधिकम् फ. 18. सर्व नास्ति ह. 19. उपवसति ह. 20. च नास्ति ड. 21. कर्तव्यम् नास्ति ड. 22. गां नास्ति ब. क. 23. इति । ननु इत्यधिकम् ड.